ह्रोखां करोत्याहृता" ९सू०। "उखाखण्डमेकमुखायां प्रक्षिप्तम् द्वितीयमुपशयया सह पिष्ट्वा, आहृता मन्त्रभर्जम्, आहृच्छब्देन क्रियामात्रमुच्यते तथा चोक्तम् (६,६,४, २) एतयैवाहृतानुपहरन् यजुरिति" क०। "आहृता मन्त्ररहितेतिकर्त्तव्यतया" संग्र०। "पक्वायामावपति कपालं च १०सू०। "पक्वायामुखायाम् अग्निं कपालं च" क०। 'उखोपशये पिष्ट्वा संसृज्य निदधाति" ११सू०। "उखाकपालमुपशयां च पिष्ट्वा संसृज्य स्थापयति" क०।

इदानीं चयनप्रकारमाह। अभ्यात्मं चयनमुपविश्य" १२सू०। "आत्मनआभिमुख्येन चयनं कर्त्तव्यम् न पराग्गिति, तथा च नैर्ऋतीषु वचनात्पराक्चयनमुक्तम् (७, २,१,१२)। अपरो विशेषः" "सव्यबाहुमन्तरं कृत्वोत्तरलक्षणाभिरिष्टकाभिः" १३सू०"। "चेतव्यः" क०। "नित्ये सादनसूददोहसाउपधानादुत्तरे तया देवतया ता अस्येति (१२, ५३, ५५,) १४सू०। "सर्वास्विष्टकासु एते नित्ये भवतः तया देवतयेति सादनम् ता अस्येति सूददोहसाधिवदनम्" क०। "अविशेषोपदेशात्" १५सू०। "अविशेषेण ह्यनारभ्य कञ्चिदिष्टकाविशेषमेते श्रूयेते" क०। "विशेषमनुपादाय सामान्येन तयोरुपदेशात् विधानात्" संग्र०। "अनाम्नातप्रतिषेधाच्च" १६सू०। "यत्र नैर्ऋत्यादिषु नाम्नायेते नित्ये संहितायां न पठ्येते तत्रापि प्रतिषेधः श्रूयते (७,१,१,१४) सादनसूददोहसाधिवदतीति" "अतः प्रतिषेधात् सर्वत्राप्येते भवतः" संग्र०। "एकनोदनास्वेकदेशासु तन्त्रेण" १७सू०। एकनोदना अपस्या वपस्या इत्येवमादि, एकनोदना अपि यद्येकदेशा भवन्ति, यथा तासामेव देशभेदः अपस्याः पञ्चपञ्चानूकान्ते-ष्विति (१७,६,२) अतश्च प्रत्यनूकं नित्ये, देशभेदे त्वसति तन्त्रेणेति" क०। "एकनोदना एकं विधिवाक्यं यासां ताः। एको देश एकमुपधानस्थानं यासां ताः तत्र तन्त्रेण नित्ये भवतः" संग्र०। "आत्मनि यजुष्मतीः" १८सू०। "इष्टका उपदधाति न पक्षपुच्छयोः" क० (८,७,२,२)। लोकम्पृणासु दशसु दशसु मन्त्रो लोकं पृणेति (१२, ५४)। (९,१,२१२) १९सू०। "आसादनं च" २०सू०। लोकं पृणानाम्, सूददोहसाधिवदनं तु भवति अप्रतिषिद्धत्वात्" क०। 'प्रतिचिति द्वे-द्वे उपधाय" २१सू०। लोकं पृणामन्त्रवचनम्, पुनर्दशसु-दशसु। "प्रथमं द्वे-द्वे उपधाय ततो दश-दशोपदध्यात्" संग्र०। "अयुग्मगणमध्यमानूके" २२सू०। अयुग्मो य इष्टकागणो यथा वालखिल्याः सप्त तासां मध्यमानूके उपधेये" क०। "त्रिपञ्चसप्तादिगणः" संग्र०। "एका च" २३सू०। "या चैकेष्टका साप्यनूक एव, यथा विश्वज्योतिर्द्वियजुष्मत्येवमादि" क०। "अभितो युग्माः" २४सू०। "अनूकमभितोऽर्धार्धिकया युग्मा उपधीयन्ते" क०। "उदञ्चो वर्गाः पूर्वापरे" २५सू०। "यत्र पूर्वापरइति देशव्यपदेशः तत्रोदग्लक्षणा इष्टकावर्गा उपधीयन्ते" क०। "तिर्यगनूकमभितोऽर्धायावधिके पूर्वापरे देशे इष्टकानां वर्गाः समूहाः उदग्लक्षणा उपधेयाः" संग्र०। "प्राञ्चो दक्षिणोत्तरे" २६सू०। "यत्र तु दक्षिणोत्तरव्यपदेशः तत्र प्राग्लक्षणा इति" क०। "प्रागनूकमभितोऽर्धायावधिके दक्षिणोत्तरे प्राञ्चः प्राग्लक्षणाः उपधेयाः" संग्र०। "भिन्नकृष्णयोरचयनम्" (८,७,२, १६) २७सू०। "दीक्षाणामुत्तमेऽहनि वेद्यग्निमानम्" २८सू०। "कर्त्तव्यम्" क०। "उख्यस्थानेऽर्धव्यामेन गार्हपत्यस्य परिलिखति" २९सू०। "मण्डलमिति शेषः' क०। "मण्डलाद्वा प्रक्रमणमन्तःपात्यस्य" ३०सू०। "पूर्वार्धाद्व्यामस्य त्रीन् प्राचः प्रक्रमान् प्रक्रामतीति वचनात् (१०,२,२,१)। "पूर्वार्धादेव व्यामस्य प्रक्रमणम् न त्वस्माद्धि प्रक्रमणमनग्नौ चरितार्थम्" क०। "वावधारणे, मण्डलादेवान्तःपात्यस्य क्रमणम् न पूर्वार्द्धात् त्वस्मात्" संग्र०। "पश्चाद्यूपावट्या-त्मादमात्रे चित्यस्य" ३१सू०। यूपावटे भवः शङ्कुर्यूपावट्यः तस्मात्पश्चात् पद्यालोकमात्रे चित्यस्याग्निक्षेत्रस्य स्थानं भवति" संग्र०। "यजमानेनोर्ध्वबाहुप्रपदोच्छ्रितेन समस्थितेन वा" ३२सू०। (१०, २,२,६)। "प्रपदोच्छ्रितः पादाग्रे व्यवस्थितः समस्थितः प्रसिद्ध एव, तत्क्रियायानोदितत्वात्प्रक्रमणवदध्वर्युर्मा भूदिति यजमानग्रहणम्" क०। ७कण्डिका।

"द्विपुरुषां रज्जुं मित्त्वा" १सू०। "द्विपुरुषां रज्जुं मित्त्वेति निगदे व्याख्यातम्"। "उभयतःपाशाम्" २सू०। "मध्ये लक्षणम्" ३सू०। "अभितोऽर्धपुरुषयोश्च" ४सू०। "मध्यमात्लक्षणात् पुरुषपञ्चमे" संग्र० "अर्धे च" ६सू०। "पुरुषपञ्चमस्यार्धे" क०। "अनुपृष्ठ्यामायम्य पाशयोः शङ्कू मध्येऽर्धपुरुषयोश्च" ७सू०। "पाशावुन्मुच्यार्धपुरुषीययोः प्रतिमुच्य दक्षिणायाम्य मध्यमे नितोदं करोति" ८सू०। "गतम्" संग्र० "उन्मुच्य पाशावेकं मध्यमे प्रतिमुच्य दक्षिणाधिनितोदमायम्य मध्यमे शङ्कुः" ९सू०। "तस्मिन् पाशं प्रतिमुच्य पूर्वार्धे च दक्षिणायम्य मध्यमे शङ्कुः"